१८। **ऋग्वेदस्य सूक्तानि।**

मङ्गलाचरणम्

मङ्गलं व्रजनाथाय गोविन्दाय च मङ्गलम्।
राधिकाप्राणनाथाय श्रीकृष्णाय च मङ्गलम्।।

शं नो विष्णुरुरुक्रमः (ऋ.सं.म. १, अ. ९, सू. ९)

शं नो मित्रः शं वरुणः शं नो भवत्वर्यमा।
शं न इन्द्रो बृहस्पतिः शं नो विष्णुरुरुक्रमः।।

इति पूर्णमन्त्रः।

अथर्ववेदसंहिता (१९।९।६)-

शं नो मित्रः शं वरुणः शं विष्णुः शं प्रजापतिः।

शुक्लयजुर्वेदसंहिता (३६।९) (काण्वसं. ३६।३)-

शं नो मित्रः शं वरुणः शं नो भगवत्त्वर्यमा।
शं न इन्द्रो बृहस्पतिः शं नो विष्णुरुरुक्रमः।।

आनन्दिनी

मित्रदेवो नोऽस्माकं भक्तजनानां शं भक्तिसुखं भवतु, ञिमिदा स्नेहने, दिवादिः मेद्यति भक्तेषु स्निह्यति इति मित्रः।

तथाहि श्रीदशमे (२४।३२)-

अहो भाग्यमहो भाग्यं नन्दगोपव्रजौकसाम्।
यन्मित्रं परमानन्दं पूर्णं ब्रह्मसनातनम्।।

वरुणः नोऽस्माकं सुखस्वरूपो भवतु। बृणोत्यङ्गीकरोति भक्तम्, भक्तानां सेवां भक्तजनान् वाङ्गीकरोति इति वरुणः।

निरुक्ते (१०।१।३) वरुणः-बृणोतीति।

अर्यमा नोऽस्माकं शं भवतु। सोऽस्माकं मङ्गलं विस्तारयतु। इर्यति गच्छति भक्तं प्रति इति अर्यमा (महीधरः)।

शं नोऽस्माकमिन्द्रो भवतु, इन्द्रः परमेश्वरः श्रीकृष्णो वा, इदि पारमैश्वर्ये, अथ निरुक्तः (१०।१८)-इन्द्रः इरां दृणातीति वा, इरां ददातीति वा, इरामन्नम्, इरां दधातीति वा, इरां दास्यत इति वा, इरां धारयत इति वा, इन्दवे द्रवतीति वा, (द्रु गतौ) इन्दौ रमते इति वा इन्दः। इन्दतेर्वा ऐश्वर्य-कर्मणः। इन्दन् शत्रूणां दारयिता वा, द्रावयिता वा आदरयिता वा यज्वनाम्।

इन्दनः ईश्वरः (दुर्गाचार्यः) इति।

इन्द्रशब्देनात्र परमेश्वरः श्रीकृष्ण एव। तथाहि श्रीभागवते (१०।२६।२५)–**प्रियात्र इन्द्रो गवाम्** इति। बृहस्पतिः–बृहस्पतिर्देवगुरुः देवानां देवस्य वा गुरुरित्यर्थः, यद्वा बृहतां देवानां पतिः पालकः, स तु स्वयं भगवान् श्रीकृष्ण एव। श्रीभागवते (१०।२७।६)–**पिता गुरुस्त्वम्**, 'ईश्वरं गुरुमात्मानं त्वामहं शरणं गतः' इति साक्षाद्देवराज इन्द्रोऽपि यं गुरुरूपेण स्तुतः स देवानां देवेन्द्रस्य वा गुरुरिति बृहस्पतिः। निरुक्ते श्रीयास्कः (१०।१।११)--बृहस्पतिर्बृहतः पाता वा पालयिता वा। श्रीदुर्गाचार्यः–बृहतः महतोऽस्य जगतः, पाता रक्षिता, पालयितापि रक्षितैव इति। तस्माज्जगद् रक्षाकर्त्ता पालनकर्त्ता च श्रीभगवानेव। उरुक्रमः विस्तीर्णः क्रमः पादन्यासो यस्य स विष्णुः नोऽस्माकं शं मङ्गलं भवतु। ववेष्टि व्याप्नोतीति विष्णुः।

विष्णुः विश्लृ व्याप्तौ, ह्वादिः, वेवेष्टि। तथा च यो वेवेष्टि व्याप्नोति भुवनत्रयं पदक्रमणेन स विष्णुरिति।

सर्वमङ्गलदाता च सर्वसिद्धिप्रदायकः।
सर्वधारकपालकः श्रीकृष्णो भगवान् स्वयम्।।

उरुक्रमः उरु विस्तीर्णं क्रामति पादौ विक्षिपतीति उरुक्रमः। विष्णुर्हि वामनावतारे पृथिव्यादीन् लोकान् पदत्रयरूपेणाक्रान्तवान्।

अतः उरुक्रमः श्रीविष्णुश्च नोऽस्माकं शं सुखकरः उपद्रवाणां शमयिता वा भवतु।

श्रीवामनदेवस्यावतारचरितं श्रीमद्भागवते (८।१५-२३)–विस्तारेण वर्णितमस्ति तत्र द्रष्टव्यम्।

एवं श्रीवामनपुराणादौ वर्णितमस्ति। तत्र स्वयं भगवान् श्रीकृष्ण एव श्रीवामनदेवरूपेणावततारेति पौराणिकीप्रक्रिया।

तथा च श्रीदशमे श्रीअक्रूरस्तुतौ (१०।४०।१९)–**वामनाय नमस्तुभ्यं क्रान्तत्रिभुवनाय च** इति। श्रीसर्वसंवादिनी श्रीकृष्णसन्दर्भानुव्याख्यायाम् ११ अ० द्रष्टव्यम्।।१८।।

मूलम्

१९। ऋ.सं. १।५।२२।१६–**अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे। पृथिव्याः सप्तधामभिः।।**

आनन्दिनी

विष्णुः सर्वव्यापकपरमेश्वरः श्रीकृष्णः, सप्तधामभिः सप्तभिर्गायत्र्यादिभिः छन्दोभिः गायत्री- उष्णिक्-अनुष्टुभ्-बृहती-पङ्क्ति-त्रिष्टुभ्-जगती, इति सप्तभिः छन्दोभिरिति।

सप्तधामभिः–परमेश्वरः श्रीकृष्णः सप्तसंख्याभिः धामभिः सप्तधामद्वारेण पृथिव्याः सर्वदेशं विचक्रमे पदप्रसारणं कृतम्, मोक्षस्थानं वैकुण्ठपदं भक्तार्थं विस्तारितम्, भक्तेभ्यो दत्तमित्यर्थः।

सा च–

अयोध्या मथुरा माया काशी काञ्ची अवन्तिका।
पुरी द्वारावती चैव सप्तैते मोक्षदायिका।।

तस्माच्छ्रीकृष्णः सप्तधामभिः–भूर्भुवः स्वः जनः महः तपः सत्येति सप्तलोकविशेषैः परिव्याप्य तिष्ठति, तस्मात्सर्वमोक्षप्रदत्वात् परमदुर्ज्ञेयत्वात् श्रीकृष्णस्य, यतः सप्तलोकनिवासिनो देवाः इन्द्रादयः स्व-स्वप्रदेशात् नोऽस्मान्पृथिवीवर्तिमानवानवन्तु रक्षन्तु इति।

विष्ण्वात्मकमिदं सर्वं देवाः सर्वलोकाश्च ये।
तस्मादिन्द्रादयः सर्वे शं नः कुर्वन्तु सर्वदा।।१६

मूलम्

२०। **इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूल्हमस्य पांसुरे।।**१७

आनन्दिनी

विष्णुः श्रीवामनावतारे पदत्रयभूमिग्रहणावसरे त्रिविक्रमावतारधारी श्रीविष्णुः, इदं परिदृश्यमानं लोकत्रयं सर्वं जगद्वा, विचक्रमे विशेषरूपेण क्रमणं पादक्षेपं कृतवान्, श्रीत्रिविक्रमदेवः पादद्वयेनैव सर्वं जगत्क्रमणं कृतः, तृतीयं पदमसुरराजश्रीबलेः शिरसि स्थापितवान्।

अस्य श्रीविष्णोः पांसुरे धूलियुक्ते चरणस्थाने समूल्हमिदं सर्वं जगत्सम्यगन्तर्भूतम्, जगदुपरि पादविन्यासेन सर्वं जगत् श्रीविष्णोः पादरजः सदृशं जातम्।
अथ निरुक्ते दैवतखण्डे (१२।२।८, १९)–

सूक्तस्यास्य व्याख्या। श्रीयास्कः। यदिदं किञ्च तद्विक्रते विष्णुः त्रिधा निधत्ते पदं त्रेधाभावाय पृथिव्यामन्तरिक्षे दिवीति शाकपूणिः।

समारोहणे विष्णुपदे गयशिरसि इत्यौर्णनाभः। समूल्हमस्य पांसुरे प्यायनेऽन्तरिक्षे पदं न दृश्यते इति। तस्मात् श्रीवामनावताररूपस्य श्रीकृष्णस्य पादरेणुभिः सर्वं लोकं पवित्री कृतमिति।।२०।।

मूलम्

२१। **त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः। अतो धर्माणि धारयन्।।**१८।।

आनन्दिनी

अदाभ्यः–केनापि जनेन हिंसितुमशक्यः, गोपाः सर्वस्य जगतः, समग्रब्रह्माण्डं वा तस्य रक्षकः **'गुपू** रक्षणे**'** सर्वरक्षकः श्रीविष्णुः पृथिव्यादिस्थानेषु, अत एतेषु स्थानेषु त्रीणि पदानि विचक्रमे, पूर्वं व्याख्यातम्। स्वयं भगवतः श्रीकृष्णस्य त्रीणि पदानि स्थानानि ब्रह्माण्डमाक्रम्य तिष्ठन्ति, तानि च गोकुल-मथुरा-द्वारकाख्यानि।

उक्तञ्च श्रीमदुपजीव्यचरणः (लघु.भा. १।२७७)-

धामस्य द्विविधं प्रोक्तं माथुरं द्वार्वती तथा।
माथुरं च द्विधा प्राहुर्गोकुलं पुरमेव च।।

तस्मात् श्रीकृष्णस्य त्रीणि धामानि विद्यन्ते इति।

किं कुर्वन् विचक्रमे? धर्माणि धारयन् अग्निहोत्रादीनि धर्माणि धारयन् पालयन् पोषयन् वा, अथवा श्रीभागवते (११।१४।३)-

कालेन नष्टा प्रलये वाणीयं वेदसंज्ञिता।
मयादौ ब्रह्मणे प्रोक्ता धर्मो यस्यां मदात्मकः।।

श्रीस्वामिपादः-'तत्र भक्तिरेव महाफलत्वेन मुख्या, अन्यानि तु स्व स्व प्रकृत्यनुसारेण पुष्पस्थानीय स्वर्गादि फलबुद्धिभिः प्राणिभिः प्राधान्येन परिकल्पितानि खुल्लफलानीति, मदात्मकः मय्येवात्मा चित्तं येन सः' इति।

'मदात्मको मत्स्वरूपभूतः ह्लादिनीसाररूपत्वात्' इति श्रीक्रमसन्दर्भः।

श्रीगीतोपनिषदि (४।८)-**धर्मसंस्थापनार्थाय सम्भवामि युगे युगे।।** तथा-**स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात्।।** (गी. २।४०) तस्माद्धर्माणीति श्रीभागवतधर्माणि, तानि च नवविधानि, श्रीभागवते (७।५।२३)-

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्।।

इति धर्मान् विस्तारयन्नित्यर्थः।।२१।।

मूलम्

२२। **विष्णोः कर्माणि पश्यत यतो व्रतानि पश्यसे। इन्द्रस्य युज्य सखा।।**१९।।

आनन्दिनी

विष्णोः सर्वव्यापक-भक्तिधर्मपालक-श्रीकृष्णस्य कर्माणि सर्वलोकक्रमण-धर्मधारण-सर्वपालनादीनि कर्माणि पश्यत (**दृश** ज्ञाने), श्रीकृष्णस्य कर्माणि स्वज्ञानविषयं कुरुत, यद्वा प्रेमाञ्जनच्छुरितभक्ति-विलोचनेन श्रीकृष्णस्य गोवर्द्धनधारणादीनि लीला पश्यत, लीलाया नित्यत्वात्।

यतो यैः कर्मभिः व्रतानि अग्निहोत्रादीन्यथवा श्रीकृष्णस्य परितोषकराणि व्रतान्यनुतिष्ठत।

स्पश बन्धने, पस्पशे सर्वो यजमानोऽग्निहोत्रादीनि स्पष्टवान् श्रीविष्णोरनुग्रहात् अनुष्ठानं करोतीत्यर्थः।

अथवा-व्रतानि श्रीहरितोषणानि, श्रीभागवते ३।१।१९, **'व्रतानि चेरे हरितोषणानि'** इति श्रीविदुर-चरिते। श्रीअम्बरीषचरिते (श्रीभा. ९।८।१९)-

आरिराधयिषुः कृष्णं महिष्या तुल्यशीलया।
युक्तः सांवत्सरं वीरो दधार द्वादशीव्रतम्।।

इति श्रीकृष्णसन्तोषकरमेकादशी व्रतमाचचार इति।

इन्द्रस्य युज्य सखा

देवराजेन्द्रस्य परमानुकुल्यकारी सकरमित्रः, यत इन्द्रस्य प्रार्थनया त्वष्टापुत्रवृत्रासुरस्य वधं कृतवान्, दानवेन्द्रबलेर्बन्धनं च कृतवानिति।

लीलां श्रीकृष्णदेवस्य एकादश्यादि च व्रतम्। स्मर्तव्यमेव कर्तव्यं तस्य सेवाफलेप्सुभिः।।२२

मूलम्

२३। **तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्।।**२०।।

आनन्दिनी

तत्तस्य विष्णोः सर्वव्यापकस्य श्रीकृष्णस्य परमं सर्वश्रेष्ठं पदं स्थानं गोकुलादि धामानं सूरयः साधकाः श्रीकृष्णधामतत्त्वविज्ञातारः सदा सर्वदा पश्यन्ति, तस्मिन्पदे स्थाने वा श्रीकृष्णेन सार्द्धं तस्य परिकरानपि पश्यन्ति। श्रीभागवते श्रीकपिलदेवः (३।२५।३५)–

पश्यन्ति ते मे रुचिराण्यम्ब सन्तः
प्रसन्नवक्त्रारुणलोचनानि। इति

तत्र दृष्टान्तमाह–दिवीव, आकाशे यथा आततं सर्वत्र प्रसृतं चक्षुः यथा आवरणभावेन सर्वं दिवं पश्यन्ति, तथा श्रीकृष्णतत्त्वपरिज्ञातारः सूरयः सर्वदा कालत्रयेऽपि स्व-स्वभावानुसारेण श्रीगोकुलादि-धामानि पश्यन्ति।

कृष्णस्य परमं पदं सदा पश्यन्ति सूरयः।
भक्त्याविशुद्धमनसस्तत्र लीलापरं प्रभुम्।।२३

मूलम्

२४। **तद्विप्रासो विपन्यवो जागृवांसः समिन्धते। विष्णोर्यत्परमं पदम्।।**२१।।

आनन्दिनी

पूर्वोक्तं येन श्रीवामनरूपेण ब्रह्माण्डमाक्रान्तं, इन्द्रस्य परमानुकूलञ्च कृतं सस्वयं भगवतः श्रीकृष्णस्य यत्प्रसिद्धं भवविरिञ्चादिवन्दनीयं परमं सर्वोत्कृष्टं पदं श्रीवृन्दावनमस्ति, तत्स्थानं वनं वा विप्रासः मेधाविनः समिन्धते सम्यक् दीपयन्ति, उपासन्ते इत्यर्थः। कीदृशा मेधाविनः? तत्राह–विपन्यवः विशेषेण स्तोतारः विशेषरूपेण श्रीकृष्णस्य नाम-गुण-लीलादिसंकीर्तनद्वारेण स्तवकर्तारः, ते च जागृवांसः शब्दार्थयोः श्रीकृष्णादिशब्देषु तथा तेषां शब्दानांमर्थेषु च जागरुकः। श्रीकृष्णस्य नाम-गुण-लीला-धाम-परिकरादीनां विषये प्रमादालस्यपरित्यागेन जागरणशीलः। तथा च श्रीगीतासु (२।६९)–

या निशा सर्वभूतानां तस्यां जागर्त्ति संयमी

तस्मात् श्रीभक्तियोगे जागरुक इत्यर्थः।।२१

श्रीकृष्णस्य पदं नित्यं मेधाविनः समिन्धते।
नामलीलाविवेकिनो जागरुकश्च सर्वदा।।२४

मूलम्

२५। (१।२२।१५४)-

श्रीविष्णोर्नु कं वीर्याणि प्रावोचं
यः पार्थिवानि विममे रजांसि।
योऽस्कभायदुत्तरं सधत्थ
विचक्रमाणस्त्रेधोरुगायः।।१

आनन्दिनी

हे मानवाः! विष्णोः सर्वव्यापनशीलस्य श्रीगोविन्ददेवस्य वीर्याणि वीरकर्माणि असुरनिग्रहादीनि नु कमतिशीघ्रं प्रवोचं प्रब्रवीमि प्रकृष्टरूपेण कथयामि, कानि तानि वीर्यकर्माणि? तत्राह—यः श्रीविष्णुः पार्थिवानि पृथिवीसम्बन्धिनी रजांसि रञ्जनात्मकानि पृथिव्यादि-लोकत्रयाभिमानीनि अग्नि-वायु-आदित्यरूपाणि रजांसि विममे विशेषेण निर्मितवान् निर्ममे अत्र लोकत्रयमपि पृथिवीशब्दवाचा, तथा सूक्तान्तरं (१।१०८।९)-

"यदिन्द्राग्नी अवमस्यां पृथिव्याम्"

अत्र पृथिवीशब्दस्त्रिष्वपि लोकेषु वर्तते (सायनः) तस्मात् लोकत्रयस्य पृथिवीशब्द-वाच्यत्व-मित्यर्थः। किञ्च यः च सर्वव्यापकः श्रीविष्णुः उत्तरं उद्गततरमतिविस्तीर्णं सधस्थं सहस्थानं लोकत्रयस्याश्रय-भूतमन्तरिक्षमस्कमायत् तेषां लोकत्रयाणामाधारत्वेन स्तम्भित-वान्निर्मितवानित्यर्थः। अनेन श्रीविष्णो-रन्तरिक्षाश्रितं त्रिलोकमपि सृष्टवानित्युक्तं भवति।

यद्वा—यः श्रीविष्णुः पार्थिवानि पृथिवीसम्बन्धीनि रजांसि पृथिव्या अधस्तनसप्तलोकान् विममे विविधं निर्मितवान्। अत्र रजःशब्दो लोकवाची, यदुक्तं श्रीयास्केन—**रजःशब्दनिर्वचने लोका रजांस्युच्यते** (१८८ पृ.) इति। किञ्च यश्च उत्तरमुद्गततरमुत्तरकालभाविनं सधस्थं सहस्थानं पुण्यकृतां भक्तिमतां साधकानां निवासयोग्यं वैकुण्ठादिलोकमस्कभायत्स्कम्भितवान् विशेषरूपेण सृष्टवानित्यर्थः।

अथवा—

श्रीविष्णुः पार्थिवानि पृथिवीनिमित्तकानि रजांसि लोकान् विममे, भूरादिलोकत्रयमित्यर्थः। भूम्यामुपार्जितकर्मफलभोगार्थत्वादितरलोकानां तत्कारणत्वम्, स्वर्गादिलोकानां श्रीविष्णुरेव कारणम्, तस्य सृष्टत्वात्।

सधस्थम्–उपासकानां सहस्थानं सस्य लोकमस्कभायत्स्कम्भितवान्स्वभक्तं ध्रुवं स्वलोके स्थापितवानित्यर्थः। किं कुर्वन् स्थापितवान्? तत्राह–त्रेधा इति। त्रेधा त्रिप्रकारं विचक्रमाणः स्वसृष्टान् लोकान् क्रममाणस्तिष्ठतीत्यर्थः। तस्मादूरुगायः ऊरुभिः महद्भिर्गीयमानः, अतिप्रभूतं गीयमानो वा, एवं यः कृतवान् तादृशस्य सर्वव्यापकस्य श्रीविष्णोर्वीर्याणि प्रवोचं प्रकृष्टरूपेण ब्रवीमि इति।

अथवा

विष्णोर्नु कं वीर्याणि प्रवोचम्

हे ऋषभः! सर्वव्यापक-सर्वकर्तृ-सर्वस्रष्टृ-सर्वधारक-भक्तवात्सल्याद्यनन्तदिव्य-गुणालङ्कृतस्य श्रीकृष्णस्य वीर्याणि वीरकर्माणि पूतनावधादीनि कर्माणि नु निश्चयरूपेण कं जनं प्रवोचं प्रवक्तुं शक्यम्, शेषं पूर्ववत्। एवं ऋङ्मन्त्रानुसारेण श्रीभागवते (२।७।४०) ब्रह्मा–

विष्णोर्नु वीर्यगणनां कतमोऽर्हतीह
यः पार्थिवान्यपि कविर्विममे रजांसि।
चस्कम्भ यः स्वरंहसास्खलता त्रिपिष्टं
यस्मात् त्रिसाम्यसदनादुरुकम्पयानम्।।

टीका (श्रीस्वामिपादः)–इदं मया संक्षेपेणोक्तं विशेषेण वक्तुं न कोऽपि समर्थ इत्याह--श्रीविष्णोरिरिति। पृथिव्याः परमाणूनपि यो विममे विगणितवान् तादृशोऽपि को नु विष्णोर्वीर्यगणानां कर्त्तुमर्हति।

यो विष्णुः त्रिपृष्ठं सत्यलोकं चस्कम्भ धृतवान् तस्य। किमिति चस्कम्भ? यस्मात् त्रैविक्रमे अस्खलता प्रतिघातशून्येन स्वरंहसा स्वपादवेगेन त्रिसाम्यरूपं सदनमधिष्ठानं प्रधानं तस्मादारभ्य ऊरु अधिकं कम्पयानम्। कम्पेन यानं यस्येति वा। आ त्रिपिष्टपमिति वा। सत्यलोकमभिव्याप्य यः सर्वं धृतवानित्यर्थः।तथा च मन्त्रः–**विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि। योऽस्कभायदुत्तरं सधस्थं विचङ्क्रमाणस्त्रेधोरुगायः**।। (१।२१।१५४) (१)

अस्यार्थः–विष्णोर्नु वीर्याणि कं प्रवोचं कः प्रावोचदित्यर्थः। यः पार्थिवानि रजांस्यपि विममे सोऽपि। यो विष्णुः त्रेधा विचङ्क्रमाणः विक्रमः त्रिः कुर्वन्नुत्तरं लोकमस्कम्भयदवष्टब्धवान्। कथम्भूतम्? सधस्थम्, सहस्य सधादेशः, तिष्ठन्तीति ष्ठाः। तत्रस्थैर्दिवैः सह वर्त्तमानमित्यर्थः।

नान्तं विदाम्यहममी मुनयोऽग्रजास्ते
मायाबलस्य पुरुषस्य कुतोऽवरा ये।
गायन् गुणान् दशशतानन आदिदेवः
शेषोऽधुनापि समवस्यति नास्य पारम्।।

(भा. २।७।४१) टीका श्रीस्वामिपादस्य–एतं प्रपञ्चयति–नान्तमिति। पुरुषस्य यन्मायाबलं तस्य अन्तं न विदामि न वेद्मि। दशशतास्याननानि यस्य स शेषोऽपि अस्य गुणान् गायन् अधुनापि पारं न समवस्यति न प्राप्नोति (२।७।४१) इति।

पुनश्च (भा. ११।४।२)–

यो वा अनन्तस्य गुणाननन्ता-
ननुक्रमिष्यन् स तु बालबुद्धिः।
रजांसि भूमेर्गणयेत्कथञ्चित्
कालेन नैवाखिलशक्तिधाम्नः।।

टीका (श्रीस्वामिपादः)–अनुक्रमिष्यन् गमयितुमिच्छति यः स तु बालानामिव बुद्धिर्यस्य स मन्दमतिः। कालेन महता कोऽपि महामतिः रजांसि गणयेदपि अखिलशक्तिधाम्नः सर्वशक्त्याश्रयस्य भगवतो गुणांस्तु नैव गणयेदिति।

तस्मात् स्वेतरसर्वाश्रयस्य सर्वसृजनशीलस्य श्रीकृष्णस्य गुणान् को वा मन्दमति-र्गणयितुमिच्छेन्न कोऽपीत्यर्थः।

अनन्तगुणपूर्णस्य गोविन्दस्य महात्मनः।
गणयेत् को गुणान् तस्य रत्नाकरवीचिमिव।।२५

मूलम्

२६। **प्रतद्विष्णुः स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः।**
यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा।।२।।

आनन्दिनी

यस्येति पूर्वोक्तः श्रीविष्णुरेव स सर्वव्यापकश्रीकृष्णः, वीर्येण स महानुभावः श्रीकृष्णः पूतनावधादि-वीरकर्माणि सर्वैर्जनैः स्तवते स्तूयते। तस्य वीर्येण स्तूयमानत्वे मृगो न, सिंहादिरिव, यथा स्वविरोधिनो मृगयिता सिंहः, भीमः भीतिजनकः, सिंहो यथा मृगस्य भीतिजनकः, स च सिंहः कुचरः कुत्सितहिंसादिकर्त्ता झम्पदानेन हिंसां करोति, अथवा कुचरः कुत्सितप्रदेश-विचरणशीलः, गिरिष्ठाः पर्वताद्युन्नतादिदेशस्थायी, श्रीकृष्णः कंसादीनां भीतिप्रदाता तथा चाणुरादीनां मल्लयुद्धेन कुत्सितरूपेणमारकः, गिरिष्ठाः गोवर्द्धनपर्वतनिवासी तं श्रीगोविन्ददेवं सर्वैर्जनैर्देव-गणैर्वा स्तूयते।

किञ्च स शत्रूणां भयानकः, तथा सर्वेषां भयप्रदायकः तथा च तैत्तिरीयोपनिषदि (२।८।१)–

भीषास्माद्वातः पवते भीषोदेति सूर्यः।
भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चम।। इति

श्रीमद्भागवते (३।२९।४०)-

यद्भयाद्वाति वातोऽयं सूर्यस्तपति यद्भयात्।
यद्भयाद्वर्षते देवो भगणो भाति यद्भयात्।। इत्यादि।

कुचरः-शत्रुवधादिषु कुत्सितकर्मकर्त्ता, यथा केशीवधे, श्रीमद्भागवते (१०।३७)-महासुरकेशी कंसप्रेषितः सन् घोटकरूपं धृत्वा श्रीनन्दस्य व्रजमाजगाम, सर्वेषां महद्भयमुत्पादयामास, तं तथा विलोक्य श्रीभगवान् श्रीकृष्णः प्रगृह्य पादयोर्धनुशतान्तरे क्षेपयामास। समागतेऽसुरे पुनः श्रीकृष्णस्तस्य मुखविले भुजमुरगं प्रवेशयांचकार, तस्य भुजस्तप्तलोहदण्डसम ववृधे, ततश्च **समेधमानेन स कृष्णबाहुना निरुद्धवायुश्चरणांश्च विक्षिपन्। प्रस्विन्नगात्रः परिवृत्तलोचनः पपात लेण्डं विसृजन् क्षितौ व्यसुः।।**

अपि च वृषभासुरारिष्टमपि तथैव मारयामास (१०।३६।१३)-

तमापतन्तं स निगृह्य शृङ्गयोः
पदा समाक्रम्य निपात्य भूतले।
निष्पीडयामास यथाद्रमम्बरं
कृत्त्वा विषाणेन जघान सोऽपतत्।।

अथावा कुचरः-कुषु सर्वासु पृथिवीषु **गोत्रा कुः पृथिवी** (२।१।३) इति पृथिवी परिलक्षितेषु त्रिषु लोकेषु सञ्चारी त्रिलोके विचरणशीलः।

गिरिष्ठाः-गिरिवत्सर्वदा उन्नतशिरः, अथवा पर्वतवत्सर्वदा स्थिरनिश्चयः, तथा च श्रीभक्तिरसामृत-सिन्धौ (२।१।२६)-

प्रतिकूलेऽपि सशूले शिवे शिवायां निरंशुकायां च।
व्यलूनादेव मुकुन्दो विन्ध्यावलिनन्दस्य भूजान्।। इति

अथवा-गिरि-(गिर्-शब्दो लक्ष्मीलिङ्गः २।१५०) सप्तन्यां गिरि, गिरि मन्त्रादिरूपायां वाचि सर्वदा वर्त्तमानः।

तथा हि श्रीभागवते (४।३।४५)-

त्वं क्रतुस्त्वं हविस्त्वं हुताशः स्वयम्
त्वं हि मन्त्रः समिद्दर्भपात्राणि च।। इति

एतादृशोऽयं स्वयं भगवान् श्रीकृष्णः स्वमहिम्ना स्तूयते। अपरञ्च यस्य सर्वव्यापकस्य श्रीविष्णो-रूरुषु विस्तीर्णेषु त्रिसंख्यकेषु विक्रमणेषु चरणप्रक्षेपेषु विश्वा सर्वाणि भुवनानि भूतजातान्यधिक्षियन्त्याश्रित्य निवसन्ति, यं सर्वाश्रयं श्रीकृष्णमाश्रित्य सर्वाणि भुवनानि, सर्वे जनाश्च निवसन्ति स श्रीकृष्णः स्तूयते।।२।।

गोवर्द्धनगिरौ रम्ये गोविन्दो वर्त्तते सदा।
हत्वारिष्टं महासुरं राधाकुण्डं प्रकाशयन्।।२६

मूलम्

२६। (क) **प्र विष्णवे शूषमेतु मन्म गिरिक्षित उरुगायाय वृष्णे।**
य इदं दीर्घं प्रयतं सधस्थमेको विममे त्रिभिरित्पदेभिः।।

आनन्दिनी

अत्र प्र-शब्द उपेन्द्रः (उपसर्गः) सर्वतोभावः, विष्णवे सर्वव्यापकाय श्रीकृष्णाय प्र-सर्वतोभावेन शुषम् अस्मदादीनां शुभकृत्यादिजन्यं बलं महत्वम्, अस्माकं शुभजन्यं मन्म मननं गोवर्द्धनधारणादिलीलास्तोत्रं मननीयं शूषं बलं वा स्तवेन यत्पुण्यं तत्सर्वं श्रीकृष्णमेतु प्राप्नोतु, सर्वं श्रीविष्णवे समर्पयामीत्यर्थः।

उक्तं च श्रीभगवता (९।२७)–

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्।।

कर्मणः सम्प्रदानत्वात् चतुर्थी। कीदृशाय श्रीविष्णवे कर्मफलं समर्पयामीत्याह–गिरिक्षिते। गिरिक्षिते वाचि तिष्ठते अप्राकृतलक्षणरूप-वेदवाक्ये प्रकाशते, वैदिकशब्दवाच्यमित्यर्थः।

अथवा

गिरिक्षिते–गिरिक्षिते गिरिवदुच्चप्रदेशे तिष्ठते, श्रीगोवर्द्धनपर्वतोपरि विहरणशीलाय, उरुगायाय बहुभिर्भक्तजनैर्गीयमानाय, अनेन तस्य नामकीर्त्तनमुक्तं भवति। वृष्णे वर्षुकाय, स्वभक्तानां नाना-प्रकारकामनानां वर्षणकारिणे, एवं प्रकारं महाप्रभावपूर्णं सर्वव्यापकं श्रीकृष्णं शुषं मम सर्वकर्मफलं प्राप्नोतु।

ननु कोऽस्य विशेषो यं सर्वकर्मफलं समर्पयामीत्यपेक्षायामाह–य इति। यः प्रसिद्धः श्रीविष्णुः इदं सर्वजनानुभवयोग्यं दृश्यमानं दीर्घमतिविस्तृतं प्रयतं नियतं सधस्थं सहस्थानं लोकत्रयं ब्रह्माण्डं वा एक इत्-एक एवाद्वितीयः सन् त्रिभिः पदेभिः पादैर्विममे विशेषेण निर्मितवान्, येन एकेनैवाद्वितीय सन् पादत्रयक्षेपणयोग्यं लोकत्रयं स्वविहारयोग्यं कृत्वा विशेषरूपेण परमरमणीयं कृत्वा निर्मितवानित्यर्थः। त्रिभिः पदैरिति।

स्वयं भगवतः श्रीकृष्णदेवस्य स्थानत्रयमिति।

तथाहि श्रीभागवते (१०।११।३६)–

वृन्दावनं गोवर्द्धनं यमुनापुलिनानि च।
वीक्ष्यासीदुत्तमा प्रीती राममाधवयोर्नृप।। इति
गोविन्दस्य व्रजे नित्यं स्थानत्रयं विराजते।
वृन्दावनं गोवर्द्धनं कृष्णापुलिनमेव च।।
आचार्यनीलकण्ठस्य करुणालेशवर्त्मना।
षडक्षरमहामन्त्रं श्रीकृष्णस्य प्रकाशते।।

विष्णोर्वीर्याणीति–श्रीकृष्णस्य वीरकार्योपलक्षितं कामम्, तस्य नानाविधलीलाप्रकाशनशीलस्य लीलाप्रकाशनविषये काममिच्छा, वीर्याणीति बहुत्वं श्रीकृष्णस्य सर्वावयवाभिप्रायेण, अत्र वाच्यवाचकयो-रभेदात्तदभेदप्रतिपादकमर्थं प्रवोचं प्रोक्तवानस्मि। तमेव दर्शयति–यः सर्वव्यापको विष्णुः श्रीकृष्णः कं ककारं पार्थिवानि रजांसि विनिर्मितवान्, पृथिवी देवता येषां तानि पार्थिवानि, तेन लमिति पृथिवीबीज-मुद्धृतं भवति, अथ "**तत्त्वात्मनः स्मृताः स्पर्शा मकारः पुरुषो यतः**" इति स्मृतेः, अनेन मकारलब्धः। एवं ककार-लकार-मकारमुद्धृतम्। अत्र ईकारमुद्धरति–"**त्रेधा विचक्रमाणः**" अस्मिन्मातृकारूपे जगदण्डे त्रेधा विक्रममाणः त्रीन् वर्णान् अ-आ-इ-एतान् वर्णत्रयान् लङ्घयन् चतुर्थ उरुगायो दीर्घतया गेयः 'ई'कारः, तद्रूपोऽयमित्यर्थः। तेन क-ल-मकारसंयोगात्मकं कामबीजमुद्धृतं भवति। तत्तु 'क्लीम्' इति।

श्रीगोपालतापन्याम् (१।३५)–कादपो लात् पृथिवी ईतोऽग्निः विन्दोरिन्दुः इति। अत्र श्रीप्रबोधानन्द-सरस्वतीपादः–

पञ्चालङ्कारसंयुक्तं बीजन्तु परमाद्भुतम्।
लकारात् पृथिवी जाता ककाराज्जलसम्भवः।।
ईकारादग्निरुत्पन्नो नादाद्वायुः प्रजायते।।

ककारः पुरुषः कृष्णः सच्चिदानन्दविग्रहः।
ईकारः प्रकृति राधा नित्या वृन्दावनेश्वरी।।

लश्चानन्दात्मकं प्रेमसुखत्वे परिकीर्त्तितम्।
चुम्बनानन्दमाधुर्यं नादो विन्दुः समीरितम्।।
ककारो नायकः श्रेष्ठ ईकारो नायिका वरा।
लकारो ह्लादरूपा च विन्दुश्चुम्बनमुच्यते।। इति

२६ ख। '**कुचरो गिरिष्ठाः**।'

कुचरः कौ पृथिव्यां भूतपूर्वः भुवि कृतावतारः, पूर्वं ब्रह्मादिदेवानां प्रार्थनया अवतारं कृतं येन सः, भीमः–दीर्घं शब्दं त्रिलोकमोहनं मुरलीरवं कुर्वाणः, गिरिष्ठाः–गिरौ गोवर्धने तिष्ठतीति तादृशः, तस्मात्तादृशः कृष्ण इति लक्ष्यते।

ग। **प्रविष्णवे।**

प्रविष्णवे–तस्मै गिरिष्ठाय गोवर्द्धनपर्वतोपरि स्थिताय, शूषं सर्वं त्रिलोकं प्रसवं सृष्टिं सत् मनुते अत्र हृदयम् इति नमः शब्द उच्यते।

तथा च श्रीक्रमदीपिकायाम् (२।४३।, ७।८३)-

"तारं हार्दं विश्वमूर्तिश्च शार्ङ्गी"

हार्दं हृदयं नमः इति टीका।

तारं हृत् भगवान् ङेन्तः हृत् नमः इति टीका, तस्मात् मन्म हृदयमिति नमः इति। अत्र नमः शब्दसंयोगाद्विष्णवे इति द्वितीया स्थाने चतुर्थी-तथात्वे कृष्णशब्दाच्चतुर्थी ग्राह्या।

तथानुशासनम्-श्रीहरिनामामृतवैष्णवव्याकरणे (४।११८) नम आदिभिर्योगे चतुर्थी।

तस्मात् क्लीं कृष्णाय नमः इति श्रीकृष्णस्य मन्त्रं भवति, तथा च गिरिक्षिते-गोवर्द्धननाथाय उरुगायाय महाकीर्तये वृष्णे अभिमतफलवृष्टिकारिणे नमः इत्यर्थः। स च त्रिभिर्विममे त्रिभिरेव पदैः, जनानां स्थानम्, भुवनकोषं वेदादिवाङ्मयं च सर्वं परिमितवान्। त्रिपदैरिति क्लीं-पदेन जनानां स्थानं कृष्णाय-पदेन भुवनकोषं नमः-पदेन वेदादिवाङ्मयं वाप्यं तिष्ठतीति।

क्लीं कृष्णाय नमो नित्यं गोवर्द्धनधराय च।
सर्वमन्त्रशिरोमणिः क्लीं कृष्णाय नमः मनुः।।२६

२७। **मूलम्**

यस्य श्रीपूर्णा मधुना पदान्यक्षीमाणा स्वधया मदन्ति।
य उ श्रीधातु पृथिवीमुत द्यामेको दाधार भुवनानि विश्वा।।

आनन्दिनि

श्रीविष्णोः सर्वव्यापकस्य स्वयं भगवतः श्रीकृष्णस्य मधुना नाम मधुना दिव्यलीलामृतेन वा त्रीणि पदानि पूर्णपादप्रक्षेपण योग्य स्थानानि गोकुलादीनि अक्षीयमाणा अक्षीयमाणानि परिक्षयरहितानीन्यर्थः।

श्रीकृष्णस्य गोकुलादि धाम त्रीणि सर्वदा तस्य दिव्य लीलामृतेन पूर्णानीति भावः।

यः श्रीविष्णुः उ पादपूरणम् य एव श्रीविष्णुः पृथिवीं प्रसिद्धां भूमिं उत द्यां प्रकाशमानमन्तरिक्षं च विश्वा भुवनानि सर्वाणि भूतजातानि चतुर्दश लोकांश्च।

अथवा-

पृथिवीशब्देन अधोवर्तिनी अतल-वितल-सुतल-तलातल-महातल-रसातल-पातालादि सप्तभुवनानि। द्युशब्देन तदवान्तररूपाणि भूरादीनि-भू-भुव-स्व-जन-मह-तप-सत्यादीनि सप्तभुवनानि।

एवं चतुर्दशलोकान् विश्वाभुवनानि सर्वाण्यपि तत्रत्यानि भूतजातानि।

त्रिधातु-त्रयाणां धातूनां समाहारस्त्रिधातु, तच्च पृथिव्यप्तेजो रूप धातुत्रयविशिष्टं यथा भवति तथा दाधार, धृतवान् दाधार-**तुजादीनां दीर्घोऽभ्यासस्य** (६।१।७) पा० सू० इति। एतत्सर्वं स श्रीविष्णु उत्पादयामास।

अत्र श्रुतिः (छा० ६।२।४)-

'तत्तेजोऽसृजत' 'ता आप ऐक्षन्त' 'ता अन्नमसृजन्त' इति भूतत्रयसृष्टिमुक्त्वा- हन्ताहमिमास्तस्रो देवता, तासा त्रिवृतं त्रिवृतमेकैकां करवाणीति इत्यादिना त्रिवृत् करणसृष्टिरूपयादिता। अत्र श्रीवादरायणसूत्रम् (२।४।११।२०)-

संज्ञामूर्ति क्लृप्तिस्तु त्रिवृत् कुर्वत उपदेशात्

त्रिवृत् करणन्तु (श्रीगो० भा०)-

त्रिप्येकैकं द्विधा कुर्यात् त्र्यर्द्धानि विभजे द्विधा।
तत्तन्मुख्यार्द्धमुत्सृज्य योजयेच्च त्रिरूपता।।

पञ्चीकरणस्योपलक्षणमेतत्-

विभज्य द्विधा पञ्चभूतानि देव-
स्ततर्द्धानि पञ्चार्द्धभागानि कृत्वा।
अन्येषु मुख्येषु भागेषु तत्तत्
नियुञ्जन् स पञ्चकृतिं पश्यति स्म।। इति

एवं पञ्चीकृतप्रपञ्चं सर्वमेव श्रीकृष्णस्यैव सृष्टिः।

निर्माता नामरूपयोः संज्ञामूर्तेश्च कारकः।
सर्वज्ञो भगवान् कृष्णो न जीवः स्याच्चतुर्मुखः।।

अथवा-

भूत-भविष्यत्-वर्तमानकालत्रयं दाधार, यद्वा सत्व-रजस्तमो गुणत्रयं श्रीविष्णुर्दाधारेत्यर्थः।।

स्वर्गादिलोकसप्तकमतलसप्तकं तथा।
तद्वासि च जनान् सर्वान् श्रीकृष्णः सृष्टवानेव।।२७

मूलम्

२८। **तदस्य प्रियमभिपाथो अश्यां नरो यत्र देवयवो मदन्ति।**
उरुक्रमस्य स हि बन्धुरित्था विष्णो पदे परमे मध्व उत्सः।।५

आनन्दिनी

श्रीकृष्णाय नमो नित्यं गोवर्धनधराय च।
वेणुवादनशालिने गोविन्दाय नमो नमः।।

अस्य सर्वव्यापकस्य स्वयं भगवतः श्रीकृष्णस्य प्रियं प्रियतमं पाथः अन्तरिक्षम्। तथा च श्रीयास्कः (६।२।७)-पाथोऽन्तरिक्षं पथा व्याख्यातम् अन्तरिक्षं विष्णुपदं (अमरः-१।२।१) इति तत्तु वैकुण्ठमिति, तच्च नित्यमविनश्वरमचिन्त्यादिगुणयुक्तम्। अश्यां व्याप्नुया--तद्वैकुण्ठं सर्वव्यापकमित्यर्थः। तदेव विशेषेण कथयति-यत्र वैकुण्ठे देवयवः देवं द्योतनस्वभावं विष्णुमात्मन इच्छन्तो श्रीकृष्णधामप्राप्तुमिच्छवो भक्ताः, भक्तिसाधनादिभिर्वैकुण्ठं गन्तुमिच्छवो

नरः (नृशब्दः) मदन्ति सेवासुखमनुभवन्ति। श्रीकृष्णलोकगताः तस्य सेवकाः श्रीकृष्णसेवा-सौभाग्यमति प्राप्नुवन्तीति भावः।

एवं विष्णोः सर्वव्यापकस्य परमेश्वरस्य श्रीकृष्णस्य परमे सर्वोत्कृष्ट-निरतिशयसुखस्वरूप-केवलभक्तिलभ्य पदे श्रीगोकुले मध्व उत्सः, श्रीकृष्णस्य श्रीगोकुलधाम्नि मध्व मधुररसस्य परमानन्दस्य वा, तत्तु मधुरभक्तिरस एव।

तथा हि श्रीभक्तिरसामृतसिन्धौ पश्चिमविभागे (५)–

आत्मचितैर्विभावाद्यैः पुष्टिं नीता सतां हृदि।
मधुराख्यो भवेद्भक्तिरसोऽसौ मधुरा रतिः।।

अस्मिन्नालम्बनः कृष्णः प्रियास्तस्य च सुभ्रुवः।।
असमानोर्द्ध-सौन्दर्य- लीला-वैदग्ध्यसम्पदाम्।
आश्रयत्वेन मधुरे हरिरालम्बनो मतः।।

श्रीगोविन्दस्य प्रेयस्यः–

नव नव वरमाधुरी धुरीणाः
प्रणय तरङ्ग करम्बितान्तरङ्गाः।
निजरमणतया हरिं भजन्तीः
प्रणमतः ताः परमाद्भुताः किशोरीः।।

इति मधुररसस्य व्रज एव सर्वोत्कृष्टरूपेण निस्पन्दो वर्त्तते। तस्मादत्र श्रीकृष्णगोकुले क्षुत्तृष्णा जरामरणादि-पुनरावृत्यादि भयादिकं नास्ति, तथा सङ्कल्पमात्रेण सर्वविधभोगाः प्राप्यन्ते।

तथा च श्रीश्रुतिः (छा. ८।२।१)–स यदि पितृलोककामो भवति सङ्कल्पा देवास्य पितरः समुत्तिष्ठन्ति। तेन पितृलोकेन सम्पन्नो महीयते इति।

तथा च श्रीबादरायणसूत्रम् (४।४।६।८)–

सङ्कल्पादेव तच्छ्रुतेः।

तस्मात् श्रीगोकुलाधिनायककृष्णप्राप्तेरधिकं जीवस्य प्राप्य वस्तु नास्ति।

इत्था–इत्थमुक्तप्रकारेण स सर्वव्यापकश्रीकृष्णः हि निश्चितमेव स खलु सर्वेषां भक्तिपूतसुकृत-शालीनां बन्धुः–स्नेहेन मनो बध्नाति यः स बन्धुः, अकारणहितकरः।

तस्य उरुक्रमस्य त्रिजगदाक्रममाणस्य पदं श्रीगोकुलवृन्दावनं प्राप्तानां भक्तानां न पुनरावृत्तेः, तथा च श्रुतिः (छा. ८।१५।१)–'**स खल्वेवं वर्त्तयन् यावदायुषं ब्रह्मलोकमभि-सम्पद्यते, न च पुनरावर्त्तते**' इति।

'एतेन प्रतिपाद्यमाना इमं मानवमावर्त्तं नावर्त्तन्ते' (छा.४।१५।५) इति।

श्रीबादरायणसूत्रम् (४।४।११।२२)–'**अनावृत्तिः शब्दादनावृत्तिः शब्दात्**' द्वि-शब्देन सर्वश्रुति-स्मृति-पुराणादिशास्त्रप्रसिद्धिं द्योतयति इति।

गोविन्दपादसेवनं प्राप्य मुक्तः सुखी भवेत्।
तस्मान्मानवमावर्त्तं नावर्त्तते कदाचन।।२८

मूलम्

२९। **ता वां वास्तुन्यश्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयासः।**
अत्राह तदुरुगायस्य वृष्णः परमं पदमवभाति भूरि।।

श्रीसायनाचार्यः–हे पत्नी यजमानौ वां युष्मदर्थं ता तानि गन्तव्यत्वेन प्रसिद्धानि वास्तुनि सुखनिवासयोग्यानि स्थानानि गमध्यै युवयोः गमनाय उश्मसि कामयामहे, तदर्थं विष्णुं प्रार्थयाम इत्यर्थः।

यत्र येषु वास्तुषु गावः रश्मयः भूरिशृङ्गः अत्यन्तोन्नत्युपेता बहुभिराश्रयणीया वा अयासः अयना गन्तारोऽति विस्तृताः।

यद्वा–यासो गन्तारः अतादृशाः अत्यन्तप्रकाशयुक्ता इत्यर्थः।

तत्राह– अत्र खलु वास्त्वाधारभूतं द्युलोके उरुगायमानस्य बहुभिर्महात्मभिर्गातव्यस्य स्तुत्यस्य वृष्णः कामानां वर्षितुर्विष्णोस्तादृशं सर्वत्र पुराणादिषु गन्तव्यत्वेन प्रसिद्धं परमं निरतिशयं पदं स्थानं भूरि अतिप्रभूतम् अवभाति स्वमहिम्ना स्फुरति इति।

श्रीयास्काचार्यः–तानि वां वास्तूनि कामयामहे गमनाय। यत्र गावो बहुशृङ्गाः।

भूरीति बहुनो नामधेयम्। प्रभवतीति सतः। शृङ्गं श्रयतेर्वा, शृणातेर्वा, शम्नातेर्वा। शरणयोद्गतमिति वा, शिरसो निर्गतमिति वा, अयासोऽयनाः–तत्र तदुरुगायस्य विष्णोर्महागतेः परमं पदं परार्द्धस्थमवभाति भूति। पादः पद्यंते इति।

महा महर्षि श्रीजीवगोस्वामिपादः श्रीकृष्णसन्दर्भे (११७ अनु.)–तां तानि वां युवयोः कृष्णरामयोर्वास्तूनि लीला स्थानानि गमध्यै गन्तुमुश्मसि कामयामहे। तानि किं विशिष्टानि? यत्र येषु भूरिशृङ्गा महाशृङ्ग्यो गावो वसन्ति।

यथोपनिषदि (छा. ७।२३।१)–भूमवाक्ये धर्मिपरेण 'भूम'-शब्देन महिष्ठमेवोच्यते, न तु बहु-तरमिति, युथदृष्ट्यैव वा भूरिशृङ्गा बहुशृङ्ग्यो बहुशुभलक्षणा इति वा, अयासः–शुभाः, अयः शुभावहो विधिः (अमरः १।४।२७) इत्यस्य देवास इतिवत् जशन्तं पदमिदम्।

अत्र भूमौ तल्लोकवेदप्रसिद्धं श्रीगोकुलाख्यमुरुगायस्य स्वयं भगवतो वृष्णः सर्वकामदुघचरणार-विन्दस्य परमं प्रपञ्चातीतं पदं स्थानं भूरि बहुधा अवभातीत्याह–वेद इति।

यजुःषु माध्यन्दिनीयास्तु–'**या ते धामन्युश्मसि**' इत्यादौ '**विष्णोः परमं पदमवभाति भूरि**' इत्यन्ते पठन्ति।

पाद्मोत्तरखण्डे यत्त्वियं श्रुतिः परमव्योमप्रस्तावे उदाहृता तत्खलु परमव्योम-गोकुलयोरेकता पत्यपेक्षया इति मन्तव्यम्। गो-शब्दस्य सास्नादिमत्येव प्रचुर प्रयोगेण झटित्यर्थप्रतीतेः, श्रीगोलोकस्य ब्रह्मसंहिता-हरिवंश-मोक्षधर्मादिषु प्रसिद्धत्वाच्च।। इति

आचार्यः श्रीनीलकण्ठसूरिः-एवं गवां त्राणे कृते भग्नदर्प इन्द्र उपकृताः सुरभ्यादयो गावश्च प्रीताः सम्भूय व्रजं प्रति आगन्तुं प्रार्थयन्ते। तावामिति ता तानि वां युवयोः रामकृष्णयोर्वास्तुनि क्रीडा-स्थानानि गमध्यै गन्तुमुश्मसि कामयामहे, यत्र येषु वास्तुषु गावो भूरिशृङ्गाः महाशृङ्गाः अयासोऽयन्ति सञ्चरन्ति। अत्र अस्मिँल्लोके अह प्रसिद्धं तदुरुगायस्य महाकीर्तेः वृष्णः परमानन्दवर्षिणः परमं महत्पदं स्थानं भूरि अत्यन्तं अवभाति अवभासते (श्रीवृन्दावनकाण्डः १८) इति।।

सायन-यास्क-जीवस्य नीलकण्ठसूरेस्तथा।
पादाब्जस्मरणं कृत्वा कृष्णस्य वास्तुमुश्मसि।।

आनन्दिनी

ता तानि विचित्रकुञ्जभवनानि वां युवयोः श्रीराधाकृष्णयोर्निकुञ्जभवनादीनि गमध्यै तयोः सेवार्थं गन्तुमुश्मसि कामयामहे कामनां करोमि, '**अस्मदस्त्वगौरवेऽपि**' इत्यनुशासनात्।

तानि निकुञ्जभवनानि किं विशिष्टानि? तत्राह-यत्र गावो भूरिशृङ्गाः प्रशस्तशृङ्गयुक्ता गावो निवसन्ति। 'गो गोपसङ्घावृतम्' इति तद्ध्यानात्। अयासः-यत्र सखीगणैः सर्वदैव शुभावहविधिः प्रचलति, **गोकुलाख्यं महत्पदम्** इति गोकुलमेव यस्य उरुगायस्य कीर्तनीयस्य बहुभिर्म्महात्माभिर्गायमानस्य (सयनः) तस्य श्रीकृष्णस्य सर्वजनकामनापूर्णकारिचरणारविन्दस्य प्रपञ्चातीतं श्रीवृन्दावनं भूरि बहुप्राकरेण प्रकाशयति, तयोः श्रीराधाकृष्णयोः श्रीवृन्दावने प्रेमसेवां कामनां करोमि। तथा याभियुक्तैः-

दीव्यद्कुण्डारण्यं कल्पद्रुमाधः
श्रीमद्रत्नागारसिंहासनस्थौ।
श्रीमद्राधाश्रीलगोविन्ददेवौ
प्रेष्ठालीभिः सेव्यमानौ भजामि।।२९

३०।

मूलम्

प्र वः पान्तमन्धसो धियायते
महे शूराय विष्णवे चार्चत।
या सानुनि पर्वतानामदाभ्या-
महस्तस्थतुरर्वतेव साधुना।। (१)

(१।२१।१५५)

आनन्दिनी

हे साधकवैष्णवाः! वः युष्माकं सम्बन्धीं पान्तं पालनस्वभावं, युष्माकं पालनस्वभाव-मन्धसः–अदनीयं वस्तु "आसिञ्चतामत्रैर्मदनीयमन्धः" (श्रीयास्कः–५।१।२)। "एवमत्र दानसम्बन्धादन्धशब्दोऽत्र अन्नार्थ उपपद्यते इति। तस्मादन्धशब्देन श्रीभगवतोऽदनयोग्यं नैवेद्यं तस्मै प्र अर्चत प्रकर्षरूपेण सम्पादयत।

कस्मै तत्राह–धियायते, स्तुतीरिच्छते, महे परमहते शूराय त्रिविक्रमाय विष्णवे सर्वव्यापकाय श्रीकृष्णायान्नं सम्पादयत। तस्य महिमातिशय उच्यते–या यः श्रीकृष्णः पर्वतानां श्रीगोवर्द्धनादीनां सानुनि समतलप्रदेशे तस्थतु तिष्ठ अदाभ्यां–अदमनीय परैरनभिभाष्यः, अत एव महः महान्।

यद्वा–महो महसि स्वतेजसि श्रीगोवर्द्धनगिरिसानुनि तिष्ठतीत्यर्थः।

अत्र दृष्टान्तमाह–साधुना अभिमतप्रदेशप्रायणसामर्थ्येन अर्वता–वेगवता अश्वेन इव, यथा वेगवानश्वः पर्वतसानुप्रदेशं सातिशयवेगेनारोहति, तथा स्वयं श्रीकृष्णः श्रीगोवर्द्धनपर्वतं गोचारणाद्यर्थं वेगेनारोहति।

स्वमूर्तिरूपपर्वत- गोवर्द्धमितीरितम्।
तत्र विराजते कृष्णः प्रियसखागणैः सह।।३०

मूलम्

३१। **चतुर्भिः साकं नवतिं च नामभिः**
चक्रं न वृत्तं व्यतीरंवीविपत्।
बृहच्छरीरो विभिमानऋक्कभि-
र्युवा कुमारः प्रत्येत्याहवम्।। (१।२७।१५५)

आनन्दिनी

आदित्यात्मायं सर्वव्यापकः श्रीकृष्णः चतुर्भिः साकं सार्द्धं नवतिं च भवति, एतत् संख्यकान् कालावयवान् नामभिः स्वकीयनमनप्रकारैः प्रेरणाविशिषैः वृत्तं यथा भवति तथा व्यतीन् विविधायतन-स्वभावान् चक्रं न बहु अरोपेतमनेकारयुक्तं चक्रमिव तं यथा शत्रोरुपरि प्रक्षेपणाय भ्रामयति, तथा उक्त-संख्याकान् कालावयवान् अवीविपत् कम्पयति भ्रामयति वा, (टुवेपृ कम्पने)।

के पुनस्ते कालावयवाः? तत्राह–संवत्सर एकः, उत्तर-दक्षिणे द्वे अयने, पञ्चर्तवः, ऋतुपञ्चकम्।

तथा च श्रीयास्कः (४।४।२८)-पञ्चर्तवः संवत्सरस्य इति च ब्राह्मणम्, हेमन्तशिशिरयोः समासेन (समासेन एकत्वेन) इति। द्वादशमासाः, चतुर्विंशतित्यर्धमासाः, ते च चतुर्विंशतिपक्षाः, प्रतिमासि त्रिंशदहोरात्राः, प्रतिदिनं अष्टौ यामाः, एवं प्रतिदिने पर्यावर्त्तमानानि मेषादि द्वादश लग्नानि इति चतुरधिकनवतिसंख्यकानवीविपत्।

ननु ग्रहराजसूर्यः स्वयमपि अन्यग्रहवत् परिभ्रमति, तत्राह-एतेषां सर्वेषां ग्रहाणां भ्रामकस्य ध्रुवस्य श्रीविष्णोः मूर्त्यवताररूपत्वात्।

तथा च श्रीभागवते (५।२३।१-२-३)-**अथ तस्मात्परतः त्रयोदशलक्षयोजनान्तरतो यत् तद्विष्णोः परमं पदमभिवदन्ति।**

स हि सर्वेषां ज्योतिर्गणानां ग्रहनक्षत्रादीनामनिमिषेणाव्यक्तरंहसां भगवता कालेन भ्राम्यमाणानां स्थाणुरिवा वष्टभ्य ईश्वरेण विहितः शश्वदवभासते।

एवं भगणा ग्रहादय एतस्मिन्नन्तार्बहिर्योगेन कालचक्र आयोजिता ध्रुवमेवावलम्ब्य वायुनोदीर्यमाणा आकल्पान्तं परिचङ्क्रमन्ति इति।

अथवा-इतरेषां सर्वेषां भ्रमणशीलानां भ्रमणस्य स्वस्य श्रीविष्णोः स्वयं तान्भ्रामयति।

एवं कालचक्रात्मकः स्वयं भगवान् श्रीकृष्णः बृहच्छरीरः कालचक्ररूपेण विराट्पुरुषरूपेण वा सर्वदेवमनुष्यादिशरीराणां स्वशरीरत्वात्।

अथ श्रीकृष्णस्य बृहच्छरीरत्वं प्रतिपादयति-विमिमानः, विविधरूपेण स्वात्मानं मिमानो नानादेव-तिर्यगादिरूपेण विभज्य स्थापयन् भ्रामयतीत्यर्थः।

अथवा-"ऋक्कभिः स्ववक्कर्तृभिः, मन्त्रविद्भिः वा मिमिमानः विधिरूपेणानुमीयमानः। यद्यपि सर्वव्यापकः विभुः अपरिमेयस्तथापि स्वयं भगवान् श्रीकृष्णस्य भक्त्यधीनत्वात्।" तथाहि श्रीभागवते (९।८।६६)-

वशी कुर्वन्ति मां भक्त्या सत्स्त्रियः सत्पतिं यथा।

इति श्रीभगवतो भक्त्यधीनत्वं श्रूयते। तस्मात्तस्य भक्त्याधीनत्वञ्च श्रीगीतासु (१८।५५)-

भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः। इति

स च युवा सर्वत्रमिश्रणशीलः, (**यु** मिश्रणे अदा. प.)।

श्रीयास्कः (४।३।१९)- '**युवा प्रयौति कर्माणि**' प्रयौति मिश्रयति।

अथवा-नित्यतरुणः, श्रीब्रह्मसंहितायां ४२-

अद्वैतमच्युतमनादिमनन्तरूप
आद्यं पुराणपुरुषं नव यौवनञ्च। इति

अकुमारः-कुमारत्वरहितः, अतएव युवा। एवम्भूतो महाविष्णुः महामहिमायुक्तः श्रीकृष्ण आहवम्-आह्वानं प्रत्येति गच्छति, अस्माकं भक्तियुक्तावाहनं श्रीकृष्णं प्रति गच्छति, तेन सोऽस्माननु-ग्रहीतुमागच्छति।

भक्तिविद्याप्रभावेण भक्तिवशमहाप्रभुम्।
जानाति भक्तिसाधको भक्तिरञ्जितमानसः।।३१

मूलम्

३२। (१।२१।१५६, १)

भवा मित्रो न शेव्यो घृतासुति
विभूत द्युम्न एव या उ सप्रथाः।
अधा ते विष्णो विदुषा चिदर्घ्यः
स्तोमो यज्ञश्च राध्यो हविष्मता।।

आनन्दिनी

विष्णो हे सर्वव्यापकश्रीकृष्ण! मित्रो न भव, मरणात्त्रायते, इति मित्रः। तथा च श्रीयास्कः (१०।२१)–"मित्रः–प्रमीतेस्त्रायते" तथाहि अमरे (२।८।११७)–'मृतप्रमीतौ त्रिष्वेते' इति, तस्मा-न्मरणान्मरणदुःखाद्वा त्रायते इति मित्रः। अतो मरणदुःखात् त्राता भवेत्यर्थः। अथ मित्रवत् शेव्यः सुखकर्त्ता भव, शेव्यः सुखे साधुः। घृतासुतिः घृतमुदकं आभिमुख्येन नीयते येन सः।

अथवा

घृतमाज्यं परमान्नादिनैवेद्यमाभिमुख्येन नीयते यस्मै सः, **पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति। तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः।।** (भा. १०।८१।४) इति न्यायेन तस्मै यत्किमपि नैवेद्यं भक्त्या समर्पयति तदुपभुङ्क्ते।

विभुतद्युम्नः प्रभूतयशाः, एवया रक्षणाय प्रापयिता, सप्रथाः सर्वतः पृथुः, सर्वतो बृहत्। उ इति पादपूरणार्थः। हे विष्णो! हे सर्वव्यापकभक्तदुःखत्राणकर्त्ता श्रीकृष्ण! त्वं यस्मादीदृशो भवसि, अध अस्मात्कारणात्ते तव स्तोमः स्तोत्रविशेषः विदुषा त्वन्माहात्म्यवेदिना भक्तेन अर्घ्यः पुनः पुनः प्रवर्धनार्हः, तव लीलापूर्णस्तोत्रादि पुनः पुनः करणेनापि भक्तहृदयं न सम्पूर्यत इत्यर्थः।

तस्मात् हे श्रीकृष्ण! ते तव यज्ञोऽर्चनादयः हविष्मता आराधनाकारिसाधकेन राध्यः समाराधनीयः, सर्वात्मकरूपेण आराधनं करणीयमित्यर्थः।

अथवा

भक्तिमाहात्म्यविदुषा भक्तेन श्रीकृष्णस्य स्तोत्रादिः समाराधनीयः।

स्वर्गादिभोगकामेन विदुषा यज्ञादिना श्रीकृष्णमाराधनीयः इति।।३२।।

मूलम्

३३। (१।२१।१५६, २)

यः पूर्व्याय वेधसे नवीयसे
सुमज्ज्ञानये विष्णवे ददासति।
यो जातमस्य महतो महि ब्रवत्सेदु
श्रवोभि युज्यं चिदभ्यसत्।।

आनन्दिनी

यः साधकः श्रीकृष्णभक्तः पूर्व्याय पूर्वकालीनाय नित्यायेत्यर्थः, वेधसे–विचित्रजगत्सृष्टिकारिणे, नवीयसे नित्यनूतनाय परमसौन्दर्य-माधुर्यादिपरिपूर्णायेति भावः।

तथा च श्रीब्रह्मसंहितायाम् (५।१)–

ईश्वरः परमः कृष्णः सच्चिदानन्दविग्रहः।
अनादिरादिर्गोविन्दः सर्वकारणकारणम्।। इति

सुमज्ज्ञानये–स्वयं स्वरूपाय, स्वयमेवोत्पन्नाय, इति श्रीमद्भागवते (३।२।२१)–

स्वयं त्वसाम्यातिशयस्त्र्यधीशः
स्वाराज्यलक्ष्म्याप्तसमस्तकामः।
बलिं हरद्भिश्चिरलोकपालैः
किरीटकोट्येडितपादपीठः।।

एवञ्च यास्कः (६।२२) 'सुमत् स्वयमित्यर्थः'।

अथवा

सुतरां मादयतीति–सुमत्। तादृशी जाया यस्य सः।

जाया-शब्देनात्र श्रीकृष्णस्य स्वरूपशक्तेः सारह्लादिनी, तस्याः सारः श्रीराधा, तथा च ऋक्षु (१।६।३०, ५)–

"स्तोत्रं राधानां पते"

बहुवचनं पूज्यार्थे। श्रीराधानामश्रवणमात्रेणैव श्रीकृष्णो मदयुक्तो भवतीति ब्रह्मवैवर्ते श्रीकृष्ण-जन्मखण्डे ५२–

राशब्दोच्चारणादेव स्फीतो भवति माधवः।
धाशब्दोच्चारतः पश्चाद्धावत्येव स सम्भ्रमः।।

अपि च–श्रीनीलकण्ठाचार्यः, श्रीमन्त्रभागवते, श्रीवृन्दावनकाण्डे (३६)–'सुराधाः'।

अथ विश्वामित्रो नदी समुद्रापदेशेन गोपीः कृष्णं प्रत्यभिसारयति इत्यारभ्य सुराधाः शोभना मुख्या राधा यासु ताः सुराधाः। राधाया मुख्यत्वं तु ब्रह्मवैवर्ते प्रथमांशे, पद्मपुराणे उत्तरखण्डे कार्तिक-माहात्म्ये च प्रसिद्धम्–

यथा राधाप्रिया विष्णोस्तस्याः कुण्डं प्रियं तथा।
सर्वगोपीषु सैवैका विष्णोरत्यन्तवल्लभा।। इति

एवञ्च–

केचित्तु सुराधा इत्यस्य सुराधसमिति व्याख्यानं कुर्वते तेषां सुराधः शब्दस्य सान्तत्वकल्पने "सर्पिष्टेन शोचिषा यः सुराध" इति वदेकवचनान्तसमभिव्याहारादिकं निमित्तं नास्ति। विशेषतस्तु बहुवचनान्त-स्त्रीलिङ्गसमभिव्याहारात् सुराधाशब्दः आबन्त एव।

"स्तोत्रं राधानां पते" इत्यादौ स्वरान्तस्यापि स्पष्टं दर्शनात् इति श्रीनीलकण्ठः।

श्रीराधिकां नमाम्यहं राधाकुण्डविलासिनीम्।
कृष्णप्रियाशिरोमणिं वृन्दावनेश्वरीं सदा।।

तस्मै जगज्जन्मादिलील-नित्याप्राकृताचिन्त्यानन्त-दिव्यसौन्दर्य-माधुर्य-भक्तवत्सल्याद्यनन्तगुण-रत्नविभूषिताय श्रीकृष्णाय। **सुराधा** इति।

तथा च निरुक्ते (१।१।५)–"अति सु इत्यभिपूजितार्थे" अमरे च–'पूजने स्वति' सु अति, (३।४।५) इति।

तस्याः पूज्यत्वम्, श्रीराधाकृष्णार्चनदीपिकायाम् (९६-९८)–

देवस्याभेदरूपेण तप्तहेमसमप्रभाम्।
रक्तवस्त्रपरिधानां रक्तालङ्कारभूषिताम्।।
श्रीराधां वामभागे तु पूजयेत् भक्तितत्परैः।
देवी कृष्णमयी प्रोक्ता राधिका परदेवता।।
वराभयकरा ध्येया सेविता सर्वदैवतैः।
सर्वलक्ष्मीमयी सर्वकान्तिसम्मोहिनी परा॥ इति

अथ श्रीराधाध्यानम्

हेमेन्दीवरकान्तिमञ्जुलतरं श्रीमज्जगन्मोहनम्
नित्याभिर्ललितादिभिः परिवृतं सन्नीलपीताम्बरम्।
नानाभूषणभूषणाङ्गमधुरं कैशोररूपं युगं
गान्धर्वाजनमव्ययं सुललितं नित्यं शरण्यं भजे।। इति
नवगोचरणागौरीं राधाकुण्डनिवासिनीम्।
गोविन्दालिङ्गनोत्सुकां श्रीराधिकां भजाम्यहम्।।३३

मूलम्

३४। (१।२२।१५६, ३)

तमु स्तोतारः पूर्व्यं यथाविद
ऋतस्य गर्भं जनुषा पिपर्तन।

अस्य जानन्तो नामचिद्विवक्तन
महस्ते विष्णो सुमतिं भजामहे।।

श्रीलक्ष्मीधरस्वामी श्रीभगवन्नामकौमुद्याम् (३।१३९)–दीर्घतमसो वाक्यमेतत्। अस्यार्थः--उकारः छन्द : पूरणार्थः। हे जानन्तः स्वार्थकुशला जनाः, तं देवम् अस्ति कश्चिदीश्वरः इत्याबालगोपालप्रसिद्धम्, पूर्व्यां–पुरातनं सर्वस्याधिष्ठानमधिष्ठातारं च। ऋतस्य गर्भम्–उपनिषदः, तज्जन्य-ज्ञानस्य वा जठरे वर्तमानम्, औपनिषत्सिद्ध याथात्म्यम्, स्तोतारः श्रौतैः तान्त्रिकैः पौराणिकैः पौरुषेयैर्वा स्तुद्धमिति विपरिणामः।

न च एवमेव स्तोतव्यामिति कश्चिदस्ति नियमः, यथाविद यथा जानीथ तथा स्तुद्धं मन्त्रैः स्तुद्धमिति भावः।

ततश्च जनुषा पिपर्तन–छान्दसस्तनवादेशः, कर्मकर्तृ व्यत्ययश्च, जनुषा जन्मना पिपर्तन पिपृत पूर्यध्वं जन्मनः पूर्तिं प्राप्नुत, जन्मानि समापयतेति भावः।

अथवा–तं देवं जनुषा पिपर्तन-स्वच्छन्दचरितेन बहुविधेन जन्मना पूरयत मत्स्याद्य-वतारैरन्वितं वर्णयतेत्यर्थः।

अथैवमपि वयं स्तोतुमसमर्थाः, अस्य भगवतः श्रीमन्नामाप्याविवक्तन सदा कीर्तयत, हे विष्णो! व्यापक! ते महः प्रकाशं त्वत्स्वरूपप्रकाशिकां सुमतिं शोभनां मतिं भजामहे इति। अत्रापि व्यत्ययः 'भजामहे' इति ब्रह्मविद्यामाशासानाः कीर्तयतेत्यर्थः इति।

आनन्दिनी

येन केन प्रकारेण सर्वसिद्धिप्रदायकम्।
कीर्तनीयः सदा सर्वैः श्रीकृष्णनाममङ्गलम्।।

दीर्घतमा मन्त्रस्य ऋषिः।

पूर्वं श्रीअनुष्टुब् मन्त्रराजजपेन भक्तं प्रति श्रीनृसिंहदेवः प्रीतो भवति, इति प्रतिपादितम्। अत्र शङ्का, ननु एवं श्रीमन्त्रराजेन स्तुत्या जपेन मन्त्रान्तरैर्वा नामभिर्वा नाम्नां च सर्वेषामेव सर्वसिद्धिप्रदं श्रुतिशास्त्रसम्मतत्वात्। अत्र श्रुतिप्रमाणयति तमु इति।

अस्य मन्त्रस्यार्थमाह–हे जानन्तः! श्रीकृष्णतत्त्वज्ञातरः! वैष्णवाः! तं देवमस्ति कश्चिदीश्वरः इति शिशुबालमारभ्य गोरक्षकगोपालकपर्यन्तं प्रसिद्धं तं प्रसिद्धं देवं जानन्ति। तं पूर्व्यं पुरातनं सर्वादिकारणं सर्वस्याधिष्ठानमुपादानं तथा कर्तारं च, तथा च श्रीबादरायणसूत्रम् (१।४।७।२६)–

"**आत्मकृतेः परिणामात्**" "**प्रकृतिश्च प्रतिज्ञा दृष्टान्तानुपरोधात्**"
"**यतो वा इमानि भूतानि**" इत्यादि ।

तं देवं ऋतस्य गर्भम् ऋतमुपनिषदं सत्यम्, सत्यं वा यज्ञं वा (निरु. ४।३।२९) तस्मादुपनिषज्जन्य-ज्ञानस्याभ्यन्तरे वर्तमानम्।

अथवा–उपनिषदोऽभ्यन्तरे, यद्वा उपनिषज्जन्यज्ञानस्याभ्यन्तरे वर्तमानम्, तथा च औपनिषद्-सिद्धान्त-सिद्ध याथात्म्यं देवमिति।

स्तोतारः– न च गुणकीर्तनं सर्वेषामधिकारमुच्यते, तत्र वैदिकमन्त्रैः सर्वेषामधिकारमस्ति, वैदिक-कर्मैर्वा, तस्मात् गुणकीर्तनं कर्तुं सर्वे न शक्नुवन्तीति वाच्यम्, यथा विद इति वचनात्।

न चैवमस्ति, श्रोत्रैः वैदिकैः, तान्त्रिकैरागमिकैः, पौरुषेयैः संस्कृतैः प्राकृतैश्च, वैदिकगुणकीर्तनं यथा–श्रीपुरुषसूक्तम्।

तथा च श्रीगोपालपूर्वतापन्याम् (४३-५८)-तमेकं गोविन्दं सच्चिदानन्दविग्रहं पञ्चपदं वृन्दावन-सुरभूरूहतलासीनं सततं समरुद्गणोऽप्यहं परमया स्तुत्या तोषयामि–

ओं नमो विश्वरूपाय विश्वस्थित्यन्तहेतवे।
विश्वेश्वराय विश्वाय गोविन्दाय नमो नमः।।
नमः कमलनेत्राय नमः कमलमालिने।
नमः कमलनाभाय कमलपतये नमः।।
बर्हापीडाभिरामाय रामायाकुण्ठमेधसे।
रमामानसहंसाय गोविन्दाय नमो नमः।।
कंसवंशविनाशाय केशिचाणूरघातिने।
वृषभध्वजवन्द्याय पार्थसारथये नमः।।
वल्लवीवदनाम्भोजमालिने नृत्यशालिने।
नमः प्रणतपालाय श्रीकृष्णाय नमो नमः।।
वेणुवादनशीलाय गोपालाहिमर्दिने।
कालिन्दीकुल लोलाय लोलकुण्डलधारिणे।।
नमः पापप्रणाशाय गोवर्धनधराय च।
पूतनाजीवितान्ताय तृणावर्तासुहारिणे।।
निष्कलाय विमोक्षाय शुद्धायाशुद्धवैरिणे।
अद्वितीयाय महते श्रीकृष्णाय नमो नमः।।
प्रसीद परमानन्द प्रसीद परमेश्वर।
आधिव्याधि भुजङ्गेन दष्टं मामुद्धर प्रभो।।
श्रीकृष्ण-रुक्मिणीकान्त गोपीजनमनोहर।
संसारसागरे मग्नं मामुद्धर जगद्गुरो।।
केशव क्लेशाहरण नारायण जनार्दन।
गोविन्द परमानन्द मां समुद्धर माधव।।

इति

अथागमोक्तगुणकीर्तनम्, श्रीगौतमीयतन्त्रम् (१०।१४२-१५८)-

भूमौ निपत्य यः कुर्यात् कृष्णेष्टाङ्गनतिं सुधीः।
सहस्रजन्मजं पापं त्यक्त्वा वैकुण्ठमाप्नुयात्।।
नवीननीरदश्यामं नीलेन्दीवरलोचनम्।
वल्लवीनन्दनं वन्दे कृष्णं गोपालरूपिणम्।।
स्फुरद्बर्हदलोद्बद्धनील- कुञ्चितमूर्द्धजम्।
कदम्बकुसुमोद्बद्ध- वनमालाविभूषितम्।।
गण्डमण्डलसंसर्गिचलत्काञ्चनकुण्डलम्।
स्थलमुक्ताफलोदर- हारोद्द्योतितवक्षसम्।।
हेमाङ्गदतुलाकोटि- किरीटोज्ज्वलविग्रहम्।
मन्द- मारुतसंक्षोभिवलिताम्बरसञ्चयम्।।
रुचिरौष्टपुटन्यस्तवंशी- मधुरनिस्वनैः।
लसद्गोपालिकाचेतो मोहयन्तं मुहुर्मुहुः।।
वल्लवीवदनाम्भोज- मधुपानमधुव्रतम्।
क्षोभयन्तं मनस्तासां सस्मेरापाङ्गवीक्षणैः।।
यौवनोद्भिन्नदेहाभिः संसक्ताभिः परस्परम्।
विचित्राम्बरभूषाभिः गोपानारीभिरावृतम्।।
अभिन्नाञ्जनकालिन्दीजलकेलिकलोत्सुकम्।
योधयन्तं क्वचिद् गोपान् व्याहरन्तं गवां गणम्।।
कालिन्दी- जलसंसर्गिशीतलानिलकम्पिते।
कदम्बपादपच्छाये स्थितं वृन्दावने क्वचित्।।
रत्नभूधरसंलग्नरत्नासन- परिग्रहम्।
कल्पपादपमध्यस्थं हेममण्डपिकागतम्।।
वसन्तकुसुमामोद- सुरभीकृतदिङ्मुखम्।
गोवर्धनगिरौ रम्ये स्थितं रासरसोत्सुकम्।।
सव्यहस्ततलन्यस्तगिरि- वर्यातपत्रकम्।
खण्डिताखण्डलोन्मुक्तमुक्तासारघनाघनम्।।
वेणुवाद्यमहोल्लासैः कृतहुङ्कारनिःस्वनैः।
सवत्सैरुन्मुखैः शश्वद्गोपालैरभिवीक्षितम्।।
कृष्णमेवानुगायद्भि- स्तच्चेष्टावशवर्तिभिः।
दण्डपाशोद्यतकरै- र्गोपालैरुपशोभितम्।।

नारदाद्यैर्मुनिश्रेष्ठै- र्वेदवेदाङ्गपारगैः।
प्रीतिसुस्निग्धया वाचा स्तूयमानं परस्परम्।।
य एवं चिन्तयेद्देवं भक्त्या संस्तौति मानवः।
त्रिसन्ध्यं तस्य तुष्टोऽसौ ददाति वरमीप्सितम्।

इति

अथ पौराणिकस्तवैः श्रीकृष्णस्य गुणकीर्तनम्। तत्र सर्वपुराणचक्रवर्तिचूडामणिः श्रीमद्भागवत-पुराणे परमहंसकुलगुरुः श्रीशुकदेवस्य (२।४।२२)-

नमः परस्मै पुरुषाय भूयसे सदुद्भवस्थाननिरोधलीलया।
गृहीतशक्तित्रितयाय देहिनामन्तर्भवायानुपलक्ष्यवर्त्मने।।
भूयो नमः सद्वृजिनच्छिदेऽसतामसम्भवायाखिलसत्त्वमूर्तये।
पुंसां पुनः पारमहंस्य आश्रमे व्यवस्थितानामनुमृग्यदाशुषे।।
नमो नमस्तेऽस्त्वृषभाय सात्वतां विदुरकाष्ठाय मुहुः कुयोगिनाम्।
निरस्तसाम्यातिशयेन राधसा स्वधामनि ब्रह्मणि रंस्यते नमः।।
यत्कीर्तनं यत्स्मरणं यदीक्षणं यद्वन्दनं यच्छ्रवणं यदर्हणम्।
लोकस्य सद्यो विधुनोति कल्मषं तस्मै सुभद्रश्रवसे नमो नमः।। इति

श्रीदशमे व्रजस्त्रीणां साक्षात् श्रीकृष्णगुणकीर्तनम्-

अक्षण्वतां फलमिदं न परं विदामः सख्यः पशूननु विवेशयतोर्वयस्यैः।
वक्त्रं व्रजेशसुतयोरनुवेणुजुष्टं यैर्वा निपीतमनुरक्तकटाक्षमोक्षम्।।
चूतप्रवालवर्हस्तवकोत्पलाब्जमालानुपृक्तपरिधानविचित्रवेशौ।
मध्ये विरेजुरतुलं पशुपालगोष्ठ्यां रङ्गे यथा नटवरौ क्व च गायमानैः।।

इत्यादि बहुशः।

पौरुषेयैः आप्तपुरुषैः, प्रमाणपुरुषैर्वा, तद्विविधं संस्कृतभाषया कृतम्, प्राकृतभाषया प्रादेशिकभाषया कृतमिति च।

अथाप्तपुरुषकृतं संस्कृतभाषया-श्रीकृष्णाय नमः।

कन्दर्पकोटिरम्याय स्फुरदिन्दीवरत्विषे।
जगन्मोहनलीलाय नमो गोपेन्द्रसूनवे।।
कृष्णलाकृतहाराय कृष्णलावण्यशालिने।
कृष्णकूलकरीन्द्राय कृष्णाय करवै नमः।।
सर्वानन्दकन्दवाय कदम्बकुसुमस्रजे।
नमः प्रेमावलम्बाय प्रलम्बारि कनीयसे।।
कुण्डलस्फुरदंशाय वंशायत्तमुखश्रिये।
राधामानसहंसाय व्रजोत्तंसाय ते नमः।।

नमः शिखण्डचूडाय दण्डमण्डितपाणये।
कुण्डलीकृतपुष्पाय पुण्डरीकेक्षणाय ते।।
राधिकाप्रेममाद्धीक- माधुरीमुदितान्तरम्।
कन्दर्पवृन्दसौन्दर्यं गोविन्दमभिवादये।।
शृङ्गाररसशृङ्गारं कर्णिकारात्तकर्णिकम्।
वन्दे श्रिया नवाभ्राणां विभ्राणं विभ्रमं हरिम्।।
साध्वीव्रतमणिव्रात पश्यतो हरवेणवे।
कह्लारकृतचूडाय शङ्खचूडभिदे नमः।।
राधिकाधरबन्धूक- मकरन्दमधुव्रतम्।
दैत्यसिन्धूरपारीन्द्रं वन्दे गोपेन्द्रनन्दनम्।।
बर्हेन्द्रायूधरम्याय जगज्जीवनदायिने।
राधाविद्युद्वृताङ्गाय कृष्णाम्भोदाय ते नमः।।
प्रेमान्धवल्लवीवृन्द लोचन्दीवरेन्दवे।
काश्मीरतिलकाढ्याय नमः पीताम्बराय ते।।
गीर्वाणेशमदोद्दाम- दावनिर्वाणनीरदम्।
कन्दुकीकृतशैलेन्दं वन्दे गोकुलबान्धवम्।।
दैन्यार्णवे निमग्नोऽस्मि मन्तुग्रावभरार्दितः।
दुष्टे कारुण्यपारीण मयि कृष्ण कृपां कुरु।।
आधारोऽप्यपराधानामविवेकहतो-ऽप्यहम्।
त्वत्कारुण्यप्रतीक्षोऽस्मि प्रसीद मयि माधव।।

इति श्रीमद्रूपगोस्वामिपादविरचितः प्रमाणप्रणयाख्यः स्तवराजः।।

प्राकृतैः प्रादेशिकभाषया, तत्तु चण्डीदास-विद्यापति-गोविन्ददास-कवि-शेखर-सुरदास-मीराबाई प्रभृतीनां तत्तत्प्रदेशेषु प्रसिद्धमेव।

ननु प्राकृतेषु म्लेच्छभाषाया अन्तर्गतत्वात्, तस्या निषिद्धत्वात् प्राकृतभाषायां श्रीभगवद्गुणकीर्तन-मनुचितमेव इति।

उत्तरयति-विहितविषये निषेधस्य प्रवृत्ताभावात्। न च शास्त्रविहितस्यासिद्धिः, विहितस्य निषेधा-भावात्। तस्मात् एवमेव संस्कृतभाषायामेव श्रीभगवतः स्तवं कर्तव्यम्, नान्य भाषया, इति नास्ति कश्चिन्नियमः, नियमाभावत्वं प्रतिपादयति-यथा विद इति।

न च एतावता प्रसङ्गेन संस्कृतभाषाज्ञानरहितानां मानवानां प्राकृतेन म्लेच्छादिभाषारूपेण स्तवेन श्रीभगवतो गुणानुवादोऽधिकरं नास्तीति वाच्यम्, यथा विद इत्यस्य विधेः सङ्कोचप्रसङ्गात्।

तथाहि श्रुति-स्मृति-पुराणादि शास्त्रेषु श्रीभगवद्गुणानुवादः कर्तव्यः इति विधिः सुप्रसिद्ध एव।

तथा च श्रीभागवते (१।२।१४)-

तस्मादेकेन मनसा भगवान् सात्वतां पतिः।
श्रोतव्यः कीर्तितव्यश्च ध्येयः पूज्यश्च नित्यदा।।

अतो विधेर्बलवत्वात् मनुष्यमात्राधिकारित्वात्, विशेषाधिकारि-ग्राहक-मानाभावाञ्च।

तस्माद् यथा विद-जनीथ तथा स्तवं कुरुध्वम्।

न च म्लेच्छतवै म्लेच्छो ह वा एष यदपशब्दः इति म्लेच्छभाषाभ्यास-निषेधो यथा-

न सातयेदिष्टकाभिः फलानि वै फलेन तु।
न म्लेच्छभाषां शिक्षेत नाकर्षेञ्च पदासनम्।।

इति कौर्मे उपरिभागे १५ अध्यायः। इति निषेधवचनश्रवणात्केवलसंस्कृतभाषयैव श्रीभगवतो गुणानुवादः कर्तव्य इति वाच्यं, संस्कृतप्राकृतसाधारणवाक्यमात्रान्वयात्।

तथा हि श्रीभगवानेकादशे (११।२७।४५)-

स्तवैरुञ्चावचैः स्तोत्रैः पौराणैः प्राकृतैरपि।
स्तुत्वा प्रसीद भगवन्निति वन्देत दण्डवत्।।

इति प्रकृतानामपि स्वयं कण्ठरवेण गृहीतत्वाञ्च। श्रीक्रमसन्दर्भः-स्तवैः स्वनिर्मितैः क्रियात्वेन निर्देशात्। कर्त्तजन्यत्वापत्तेः, उञ्चावचैर्नानाप्रकारैः। स्तूयत एभिरिति स्तोत्रैः करणतया निर्देशेन पूर्वसिद्ध-त्वापत्तेः। पौराणैरित्युपलक्षणम्, तान्त्रिकैः श्रोत्रैश्च।

प्राकृतैरधुनान्येन निर्मितैश्च। यथोक्तं कालिकापुराणे-

यः स्वयं गद्य-पद्याभ्यां घटिताभ्यां नमस्कृतिः।
क्रियते भक्तियुक्तेन वाचिकस्तूत्तमस्तु सः।। इति

ततश्च जनुषा पिपर्तन, जनुषा जन्मना पिपर्त्तन पिपृत पूर्यध्वं जन्मनः पूर्त्तिं प्राप्नुत जन्मानि समापयत, जन्मारभ्य-यावदायुषं श्रीकृष्णकीर्तनेनैव समापयत। श्रीकृष्णनामगुणखीर्त्तनेन मानवजन्मनः पूर्त्तिर्भवति।

पिपर्त्तन-अत्र 'थ' इति वर्तमानोऽच्युतस्य मध्यमपुरुषस्य बहुवचने 'थ' प्रत्ययोऽत्र छान्दसप्रयोगात् 'तनव्' आदेशः, व्यत्ययः युष्माभिः जनुः पूर्य्यताम् इत्यत्र यूयं जनुषा पूर्यध्वम् इति।

तथा च स्वयं भगवतः श्रीकृष्णस्य एवं प्रकारेण स्तवं कृत्वा यूयं जन्मना पूर्य्यध्वम्, स्वजन्म-मातृजठरागमनरूपं जन्ममरणादिकं समापयत, तत् पुनर्जन्मादिकं समाप्तिर्भवति।

अथवा-तं श्रीगोविन्ददेवं जनुषा पिपर्त्तन स्वच्छन्दपरितेन बहुविधेन मत्स्यावतारेण, यद्वा पूतनावध-ब्रह्ममोहनगोवर्द्धनधारणादिनानाविधेन जन्मना पूरयत स्वाविर्भावकालेन स्वभक्तानां मनोहरण-कर्त्तारं वर्णयत।

ननु स्वयं भगवान् श्रीकृष्ण एवमपि एवं करुणा पूर्णोऽपि संस्कृतभाषाज्ञानरहिता वयं स्तोतुमसमर्थाः। तत्राह–अस्य भगवतः श्रीकृष्णस्य श्रीमन्नामापि आविषक्तन तदा कीर्तयत।

उक्तञ्च स्वयं भगवता श्रीगौराङ्गदेवेन–**कीर्तनीयः सदा हरिः।**

हे विष्णो! सर्वव्यापकश्रीकृष्ण! ते तव महः प्रकाशं तव स्वरूपप्रकाशिकां सुमतिं शोभनां मतिं सा च भक्तिरेव, तथा च श्रीपरमात्मसन्दर्भे (९३)–स्वरूपशक्तेः सारभूता ह्लादिनी नाम या वृत्तिः तस्या एव सारभूतो वृत्तिविशेषो भक्तिः, सा च रत्यपर-पर्य्याया भक्तिर्भगवति भक्तेषु च निक्षिप्त निजोभयकोटिः सर्वदा तिष्ठति इति।

श्रीभगवत्स्वरूपप्रकाशिका श्रीभक्तिरेव, तां सुमतिं भजामहे, अत्र व्यत्ययः 'भजामहे' इत्यत्र 'भजामहै' इति, अच्युतस्थाने विधातृलकारः।

तस्मात्तादृशी श्रीकृष्णभक्तिलाभार्थं सदा श्रीनामकीर्त्तनमेव कर्त्तव्यमिति मन्त्रार्थः।

ॐ आस्य जानन्तो नाम चिद्विवक्तन महस्ते विष्णो सुमतिं भजामहे। ॐ तत्सत् इत्यादि।

महा महर्षिश्रीपादजीवगोस्वामी श्रीभगवत्सन्दर्भे (४६)–अयमर्थः–हे विष्णो! ते तव नाम चित् चित्स्वरूपम्, अतएव महः स्वप्रकाशरूपम्। तस्मादस्य नाम्नः आ ईषदपि जानन्तः न तु सम्यगुच्चार-माहात्म्यादिपुरस्कारेण। तथापि विवक्तन ब्रुवाणाः केवलं तदक्षराभ्यासमात्रं कुर्वाणाः सुमतिं, तद्विषयां विद्यां भजामहे प्राप्नुमः। यतस्तदेष प्रणवव्यञ्जितं वस्तु सत् स्वतःसिद्धमिति।

आनन्दिनी

कथञ्चिद्ग्रहणाद् यस्य हरिरित्यक्षरद्वयम्।
संसारं नाशमाप्नोति वन्दे तस्य पदाम्बुजं ।।

अतो भयद्वेषादौ श्रीभगवद्विग्रहस्य स्फुर्तेरिव साङ्केत्यादौ मुक्तिप्रदत्वम्। तथा च श्रीभागवते (६।२।१४)–

साङ्केत्यं पारिहास्यं वा स्तोभं हेलनमेव वा।
वैकुण्ठनामग्रहणमशेषाघहरं विदुः।।

एवं श्रीनाम्नः सकृदपि ग्रहणं संसारमोचको भवति–

सकृदुच्चारितं येन हरिरित्यक्षरद्वयम्।
वद्धः परिकरस्तेन मोक्षाय गमनं प्रति।।

किञ्च तस्य फलप्राप्तये महदपराधतदर्थवादकल्पनादिकं प्रतिबन्धकं ज्ञेयम्। एवं श्रीप्रभास-खण्डे–

मधुरमधुरमेतन्मङ्गलं मङ्गलानां
सकलनिगमवल्लीसत्फलं चित्स्वरूपम्।

सकृदपि परिगीतं हेलया श्रद्धया वा
भृगुवरनरमात्रं तारयेत् कृष्णनाम।।

विशेषजिज्ञासायां श्रीनीलकण्ठसुरिकृतं श्रीमन्त्रभागवतं द्रष्टव्यम्। यत्र सार्द्धशतद्वय ऋङ्मन्त्राणां श्रीकृष्णलीलापरं व्याख्यानं दृश्यते।

उपक्रमणिकायां–यस्मिन् उपक्रमणिकायां गोकुलकाण्ड-वृन्दावनकाण्ड-अक्रूरकाण्ड-मथुराकाण्ड इति काण्डचतुष्टयं वर्त्तते।

सत्यं ज्ञानमनन्तं यत्तद्विष्णोः परमं पदम्।
प्राप्तुं मन्त्रेषु गोपाल विष्णोः कर्माणि पश्यतः।।

उपसंहारे–

सार्द्धं शतद्वयमृचां रामकृष्णकथानुगम्।
दर्शितं भगवांस्तेन तुष्यतां सात्वतां पतिः।। इति
यन्मया लपितं मौढ्यात क्षुद्रेण मन्दमेधसा ।
क्षम्यतां राधिकाप्रिय वेदमूर्तिः स्वयं प्रभो।।३४

३५। **शुक्लयजुर्वेदः।**

मङ्गलाचरणम्

शं नो मित्रः शं वरुणः शं नो भवत्यमा।
शं न इन्द्रो बृहस्पतिः शं नो विष्णुरुरुक्रः।।
(३६।९)

अस्य व्याख्यानं अष्टादशानुच्छेदं द्रष्टव्यम्।

मङ्गलं गौरचन्द्राय नित्यानन्दाय मङ्गलम्।
श्रीअद्वैतगदाधरश्रीवासाय च मङ्गलम्।।
लेखयति यथैव मां गौरकृष्णमहाप्रभुः।
विलिखानि तथाहं तु नास्ति स्वतन्त्रता मम।।३५

३६। **मूलम्** (१)

श्रीश्रीपुरषसूक्तम्

सहस्त्रशीर्षाः पुरुषः सहस्त्राक्षः सहस्त्रपात्।
स भूमिं सर्वतः स्पृत्वा अत्यतिष्ठद्दशाङ्गुलम्।।